# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-२(SEM-4) | **प्रश्नपत्रम्** - ४ | **गुणाः** - ७० |
| **विषयः** - साहित्यम् (ध्वनिवर्गः) | **कोड- CC- 5412(2)** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - ०२/०४/२०१९ | **सन्दर्भग्रन्थः**- व्यक्तिविवेकः प्रथमो विमर्शः | |

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ एकस्य ससन्दर्भं व्याख्या कार्या ।** ०५

१. कविव्यापारो हि विभावादिसंयोजनात्मा रसाभिव्यक्तव्यभिचारी काव्यमुच्यते ।

२. ततोऽस्य विशिष्टतोपगमे वा यत्र तयोरुभयोरेकैकस्य वा व्यङ्ग्यता तत्रैव ध्वनिव्यपदेशः स्यान्न केवलरसात्मनि काव्ये, वैशिष्ट्याभावात् ।

**प्रश्नः २ "अपि च काव्यविशेष इत्यत्र काव्यस्य विशिष्टत्वमनुपपन्नम्, काव्यमात्रस्य ध्वनिव्यपदेश-विषयत्वेनेष्टत्वात् तस्य रसात्मकत्वोपगमात् ।" इत्यस्य भावं विवेचयत ।** १०

अथवा

**ध्वनिलक्षणं महिमभट्टमतानुसारं सन्दूष्य अनुमाने तस्यान्तर्भावः प्रकाश्यताम् ।**

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ एकस्य ससन्दर्भं व्याख्या कार्या ।** ०५

१. शब्दस्यैकाभिधा शक्तिरर्थस्यैकैव लिङ्गता । न व्यञ्जकत्वमनयोः समस्तीस्त्युपपादितम् ॥

२. शब्दप्रयोगः प्रायेण परार्थमुपयुज्यते । नहि तेन विना शक्यो व्यवहारयितुं परः ॥

**प्रश्नः ४ ध्वनिलक्षणदोषान् यथाग्रन्थं विवेचयत ।** १०

अथवा

**महिमभट्टानुसारेण शुद्धकर्तृत्व-विशिष्टकर्तृपक्षयोः विवेचनं कुरुत ।**

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ एकस्य ससन्दर्भं व्याख्या कार्या ।** ०५

१. मुख्यवृत्तिपरित्यागो न शब्दस्योपपद्यते । विहितोऽर्थान्तरे ह्यर्थः स्वसाम्यमनुमापयेत् ॥

२. वाचकत्वाश्रयेणैव गुणवृत्तिरसङ्गता । गमकत्वैकमूलस्य ध्वनेः स्याद् विषयो न किम् ॥

**प्रश्नः ६ किं नाम शब्दव्यापारः? महिमभट्टानुसारेण विवेचयत ।** १०

अथवा

**वक्रोक्तिखण्डनं महिमभट्टदिशा निरूपयत ।**

॥ **चतुर्थान्वितिः** ॥ (Unit-4)

**प्रश्नः ७ एकस्य ससन्दर्भं व्याख्या कार्या ।** ०५

१. अथेष्यते स तत्रापि रसादिव्यक्त्यपेक्षया । काव्यमेवान्यथा न स्याद् रसात्मकमिदं यतः ॥

२. नाविवक्षितवाच्यस्य ध्वनेर्युक्ता प्रकारता । न हि प्रकारस्तस्यैव स एवेत्युपपद्यते ॥

**प्रश्नः ८ व्यञ्जनादिभिः समर्थितस्य व्यङ्ग्यार्थस्य कथमनुमानेऽन्तर्भावः इति व्यक्तिविवेककारमतं सम्यक् प्रतिपादयत । १०**

अथवा

**काव्यविशेषः इत्यत्र महिमभट्टाधारेण कः दोषः ? सम्यक् विवेचयत ।**

**प्रश्नः ९ निम्नलिखितेभ्यः दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१. व्यक्तिविवेकस्य रचयिता कोऽस्ति?

२. 'व्यक्तिविवेक' इत्यस्य कः आशयः?

३. व्यक्तिविवेकग्रन्थे कति विमर्शाः सन्ति?

४. प्रथमविमर्शे कति श्लोकाः सन्ति?

५. प्रथमविमर्शस्य नाम किम्?

६. काव्यवैशिष्ट्यं कतिविधम्?

७. रसवैशिष्ट्यं कतिविधम्?

८. विशेषणं कतिविधम्?

९. विशेष्यं कतिविधम्?

१०. व्यक्तिविवेकानुसारेण 'भक्ति'शब्दस्य कोऽर्थः?

११. रसभङ्गस्य कारणं किम्?

१२. काव्ये वैशिष्ट्यं किमधिनम्?

१३. को नाम शब्दव्यापारः?

१४. उपाधिः कतिविधः?

१५. काव्ये ध्वनितत्त्वं कतिविधम्?

०००